**दिनाङ्क :-** 16.07.2024

**प्रातः** - 06: 55

**विदेशमन्त्री डॉ. एस जयशंकरः**

विदेशमन्त्री डॉ. एस जयशंकरः ह्य: अवदत् यत् भारतस्य मार्शलद्वीपस्य च मैत्रीपूर्णद्विपक्षीयसम्बन्धस्य दीर्घः इतिहासः अस्ति यस्य विस्तारः वर्षैः नितरां जायते । मार्शलद्वीपेषु चतसृणां सामुदायिकविकासपरियोजनानां क्रियान्वयनार्थं ज्ञापनपत्रे हस्ताक्षरस्य अवसरे भाषमाणः डॉ. जयशंकरः अवदत् यत् प्रशान्तसागरे ये द्वीपाः सन्ति ते लघुद्वीपाः न अपितु बृहत्समुद्रदेशाः सन्ति। सः अवदत् यत् प्रशान्तद्वीपानां स्थायिविकासस्य अन्वेषणे तेषां समर्थनं भारतं दायित्वं मन्यते। सः एवमपि अवदत् यत् ऋतुपरिवर्तनम्, प्राकृतिकविपदः, दरिद्रतानिवारणम्, स्वास्थ्यसेवा च सामान्यानि आव्हानानि सन्ति, येषां समाधानं भारतेन मार्शलद्वीपेन च मिलित्वा करणीयम्। अस्मिन् विषये प्रशान्तद्वीपानां सहयोगित्वं भारतस्य सौभाग्यं वर्तते इति तेन प्रतिपादितम् । ध्यातव्यमस्ति यत् डॉ. जयशंकर: अद्यारभ्य द्विदिवसीय यात्रायां मॉरीशस इति देशं गच्छति।

**नेपालः-शपथग्रहणम्**

श्रीकेपीशर्मा-ओली-वर्यः चतुर्थवारं नेपालस्य प्रधान-मन्त्रित्वेन शपथवचनं स्वीकृतवान् । राष्ट्रपतिना रामचन्द्र-पौडेल-वर्येण ह्य: राष्ट्रपति-भवनस्य मुख्यभवने, शीतलनिवासे श्रीओलि-वर्याय पदस्य गोपनीयतायाः च शपथवचनं ग्राहितम् सहैव राष्ट्रपतिना नवनियुक्तेभ्यः एकविंशति-मन्त्रिभ्यः अपि पद-गोपनीयतयोः शपथवाचनं ग्राहितम् । ओलिवर्यस्य नेतृत्वभूते मन्त्रिमण्डले अधुना एनसी, यूएमएल, जनता-समाजवादी-पार्टी, लोकतान्त्रिक-समाजवादी-पार्टी इत्येतेषां दलानाम् अपि मन्त्रिणः सम्मिलिताः सन्ति। नेपाल-कांग्रेस्-दलस्य प्रकाश-मान-सिंहः ,सीपीएन-यूएमएल-दलस्य बिष्णु-प्रसाद-पौडेलश्च उप-प्रधान-मन्त्रिणौ चितौ । इत्यवसरे नेपालस्य प्रधानमन्त्रित्वेन चयनाय भारतस्य प्रधानमन्त्रिणा नरेन्द्रमोदिना श्री के पी.शर्मा ओलीवर्य: वर्धापित:, उक्तञ्च गम्भीरतापूर्णाय शसक्ताय च अग्रिमसंघठनाय भारतदेश: आशान्वितोऽस्तीति।

**नीट-यूजी**

चिकित्साक्षेत्रीयाया: नीट इत्याख्याया: स्नाकोत्तरस्तरीयाया: प्रवेशपरीक्षाया: विवादप्रकरणे सर्वोच्चन्यायालचेन एन.टी.ए. इत्यस्य अभिकरणक्षेत्रस्य स्थानान्तरणविषयिक-याचिकायाम् ह्य: टिप्पणी अस्ति निस्सारिता ।

**भारत/फिलिस्तीन**

भारतदेशेन फिलिस्तीनशरणार्थिभ्य: सार्धद्विमिलियन-डॉलर-परिमित-आर्थिकसहायताया: प्रथमपुटकं निस्सारितम्-ह्य: प्रसारिते सामाजिक-प्रसारतन्त्रीये सन्देशऽस्मिन-उक्तमस्ति यत् राशिरयं स्वास्थ्यशिक्षा-सामाजिक सेवाभ्यश्च अस्तीति।

**ट्रम्पः**

पूर्व-अमरिका देशस्य राष्ट्रपति: डोनाल्डट्रम्प: अधिकारिकरूपेण- रिपब्लिकनदलपक्षत: राष्ट्रपतिपदस्य प्रत्याशिभूतोऽस्ति ह्य: रात्रौ मिल्वौकी इत्यंत्र रिपब्लिकन-नेशनल-कमेटी इति समूहस्य सदस्यै: बहुमताधारेण श्रीट्रम्पस्य नाम्न: अनुमोदनं कृतम्। षोडशोत्तराद्विहस्रतमवर्षे विजयानन्तरं विंशत्यधिकद्विसस्रतमवर्षे च पराभवानन्तरं श्रीट्रम्पस्य अयं तृतीय: संघर्ष: अस्ति। अस्य वर्षस्य नवम्बरमासे अमेरिकादेशस्य राष्ट्रपतिपदाय निर्वाचनं भविष्यति। श्रीट्रम्पेन च ओहियो क्षेत्रस्य सीनेटराख्यं संसदसदस्यम् जेडीबेंस इत्यमुं उपराष्ट्रपतिपदाय चितोऽस्ति।

**अर्जेण्टिनाविजयः**

ह्य: प्रातःकाले मियामीनगरस्य हार्डरॉक्-क्रीडाङ्गणे कोलम्बिया-देशं एकम् शून्यम् इत्यन्तरालेन पराजित्य अर्जेण्टिना-देशः क्रमशः द्वितीयं कोपा-अमेरिका-चैम्पियनशिप् इति प्रतियोगितां जितवान्।

**।। इति वार्ता: ।।**